इयम् आकाशवाणी

दिनाङ्क :- 21.10.2024 सायं - 06:20

<u>मुख्यवार्ताः</u>

- प्रधानमन्त्री नरेन्द्रमोदी कजाननगरे समायोक्ष्यमाणे षोडशे ब्रिक्सइति शिखरसम्मेलने सहभागार्थम् श्वः रूसदेशं प्रति प्रस्थास्यति।
- भारत-चीनदेशौ पूर्वीय-लद्दाख-क्षेत्रे वास्तविक-नियन्त्रण-रेखायां रक्षा व्यवस्थाम् आधृत्य सहमतौ जातौ।
- अद्य आरक्षि-स्मृति-दिवसः आमान्यते प्रधानमन्त्री गृहमन्त्री च हुतिंगतेभ्यः आरक्षिकर्मिभ्यः श्रद्धांजलिं समर्पितवन्तौ।
- राष्ट्रपतिः द्रौपदी-मुर्मुः श्वः नवदिल्ल्यां त्रयोविंशत्यधिक-द्विसहस्रतम्-वर्षस्य पञ्चमं राष्ट्रिय-जल-पुरस्कारं प्रदास्यति।
- गुरु-शुक्रवासरयोः अर्धरात्रौ पुरी-सागर-द्वीपयोर्मध्ये भीषणातिभीषणं दाना इति चक्रवातः वर्धमानो भविष्यति इति सम्भाव्यते।

<u>प्रधानमन्त्री – रूसदेशः</u>

प्रधानमन्त्री नरेन्द्रमोदी षोडशे ब्रिक्सइति शिखरसम्मेलने सहभागार्थम् श्वः रूसदेशं प्रति प्रस्थास्यति। अत्रावधौ श्रीमोदी ब्रिक्स समूहस्य सदस्यदेशैः नेतृभिस्साकं द्विपक्षीयो-पवेशनानि समनुष्ठास्यति। विदेशमन्त्रालयेन कथितं यत् प्रधानमन्त्री श्रीमोदी राष्ट्रपतेः व्लादिमीर-पुतिनस्य निमन्त्रणे द्वाविंशति-त्रयोविंशति-दिनाङ्कयोः रूसदेशस्य यात्रायां भविष्यति इति। कजाननगरे समायोक्ष्यमाणस्य अस्य शिखरसम्मेलनस्य विषयो वर्तते-वैश्विक विकाससुरक्षयोः कृते बहुपक्षवादस्य सुदृढीकरणमिति।

<u>भारत-लद्दाखक्षेत्र</u>

भारत-चीनदेशौ पूर्वीय-लद्दाख-क्षेत्रे वास्तविक-नियन्त्रण-रेखायां रक्षा व्यवस्थाम् आधृत्य सहमतौ जातौ । नवदिल्ल्यां वार्ताहरान् सम्बोधयन् विदेशसचिवः विक्रममिस्रीइत्येषः सूचितवान् यत् अनया सहमत्या द्वाविंशत्यधिक द्विसहस्रतमवर्षे जातां चिन्तां न्यूनीकर्तुं तस्याःच समाधानम् अन्वेष्टुं साहाय्यं मेलिष्यति।

आरक्षि-स्मृति-दिवसः

देशस्य आरक्षिबलानां हुतिंगताना वीराणा च सम्मानार्थं अद्य आरक्षि-स्मृति-दिवसः आमान्यते। प्रधानमन्त्रिणा नरेन्द्रमोदिना अस्मिन् दिवसे स्वीय-सन्देशे जनानां सुरक्षां सुनिश्चितुम् आरक्षिबलानां समर्पणस्य प्रशंसा कृता। सः प्रोक्तवान् यत् ते धैर्यस्य दृढनिश्चयस्य च उदाहरणानि सन्ति। श्रीमोदी अत्रावसरे मानवीय समाह्वानानि दूरीकर्तुं कर्मिणां कृत प्रयासानां प्रशंसां कृतवान्।

विरामः

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

जल-पुरस्कारं

राष्ट्रपतिः द्रौपदीमुर्मुः श्वः नवदिल्लयां त्रयोविंशत्यधिक-द्विसहस्रतमवर्षस्य पञ्चमं राष्ट्रीय-जल-पुरस्कारं प्रदास्यति। केन्द्रीयजलशक्तिमन्त्रालयेन नव-श्रेणिषु अष्टात्रिंशत् विजेतारः घोषिताः। यथा-सर्वश्रेष्ठराज्यं, सर्वश्रेष्ठ-जनपदं, सर्वश्रेष्ठग्राम पञ्चायत्, सर्वश्रेष्ठ-नगरीय-स्थानीय-संस्था, सर्वश्रेष्ठ जल-उपयोक्तृ-संघ, सर्वश्रेष्ठ-नागरिक-समाजं च समेत्य। सर्वोत्तम-राज्यस्य-वर्गे ओडाशा-राज्यं प्रथम पुरस्कारं प्राप्नोत्। उत्तरप्रदेश -राज्यं द्वितीय-स्थानं प्राप्नोत्, गुजरात-पुद्दुचेरी राज्ये

संयुक्तरूपेण तृतीस्थानं प्राप्तवन्तौ। प्रत्येकं पुरस्कारविजेता प्रशंसापत्रं, परितोषिकं तथा च कतिपयेषु वर्गेषु धनपुरस्कारान् प्राप्स्यति।

## प्रधानमन्त्री उडान योजना

क्षेत्रीय-सम्पर्क-योजना उड़ानइति उडे-देश का आम नागरिक इति योजना अद्य अष्टवर्षाणि सम्पूरितानि। अत्रावसरे समायोजितं समारोहं सम्बोधयन्  केन्द्रीय-नागरि-विमाननमन्त्री किंजरापुराममोहन नायडूः उक्तवान् यत् अनया योजनया देशे अवसराणां विकासानञ्च नवीनाः सम्भावनाः उद्घाटिताः। अपिच नवीनेभ्यः आगन्तुकेभ्यः निवेशकेभ्यः विकासाय च नवीनाः अवसराः सृजिताः कृताः। यथा हि सहस्राधिकं युवानः वृत्यवसरान् प्राप्तवन्तः। असौ पुनः अकथयत् यत् विगतेषु दशवर्षेषु विमानपत्तनस्थानकानां संख्या चतुःसप्ततितः संवर्ध्य सप्तपञ्चाशदधिकैंकशतं यावत् जाता। प्रधानमन्त्री नरेन्द्रमोदी अद्य अवोचत् यत् प्रशासनस्य उडानयोजना भारतस्य विमानन-क्षेत्रस्य परिदृश्यं परिवर्तितम्। उडानयोजनायाः अष्टमे वर्षसम्पूर्त्यवसरे प्रधानमन्त्री सामाजिक-सञ्चारपटले अलिखत् यत् अनया योजनया विमानपत्तनस्थानकानां मार्गाणां संख्यायां वृद्धया साकं विमायात्रा सरला जाता।

## प्रधानमंत्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना निगदितं यत् भारतं वैश्विक-भविष्यस्य निर्माणे महत्वपूर्णं भूमिकां निर्वहतीति। असौ अवदत् यत् देशोऽयं सर्वेषु क्षेत्रेषु एकया अभूतपूर्वगत्या संर्वधमानो विद्यते। एकेन सर्वकारीयेतर-सञ्चार-माध्यम-समूहेन आयोजितं विश्वशिखरसम्मेलनं सम्बोधयन् प्रधानमन्त्री कृत्रिममेधायाः आकांक्षिभारतस्य च चर्चां कृतवान्।

## पीएम ऑन आर्टीफीशियल इंटेलीजेंस- 36 से.

कोविड-नवदश-वैश्विक-अर्थव्यवस्था मुद्रास्फीति-वृत्याभाव-ऋतुदशापरिवर्तन-इत्यादीन् विष्यान् उररिकृत्य श्रीमोदी प्रावोचत् यत् वैश्विक स्थितयः अपि भारतं प्रभावितं कुर्वन्ति। प्रधानमन्त्रिणा अग्रे प्रोक्तं यत् राष्ट्रिय-जनतान्त्रिक-संयुतेः प्रशासनस्य तृतीयकार्यकालस्य केवलं पञ्चविंशत्यधिकै कशतदिवसेषु एव नवलक्ष-कोटिरूप्यकाणां व्ययस्य आधारभूतसंरचना-परियोजनानाम् अनुमोदनं जातम् अपिच पञ्चदश नवीनानि वन्देभारत रेलयानानि प्रवर्तन्ते।

<u>शिवराजःभूमि-अभिलेखः</u>

ग्रामीण-विकास-मन्त्री शिवराजसिंह-चौहानः प्रोक्तवान् यत् प्रशासनेन षड्विंशतिसहस्राधिक षड्लक्षाधिकं ग्रामेषु भूम्यभि-लेखानां साङ्गणकीकरणं कृतम्। यस्मिन् पञ्च-सहस्राधिकम् उप-पञ्जीयक- कार्यालयाः समाविष्टाः। असौ अद्य नवदिल्ल्यां नगरीय-भूम्यभिलेखानां कृते सर्वेक्षण-पुनसर्वेक्षणयोः अत्याधुनिक-प्रौद्यौगिक्यां समायोजिताम् अन्ताराष्ट्रिय कार्यशालाम् उद्घाटितवान्।

<u>दिल्ली-प्रदूषणम्</u>

केन्द्रीय-प्रदूषण-नियन्त्रणमण्डलेन दिल्ल्यां वायुगुणवत्ता प्रतिकूल-वर्गे स्थापिता। मण्डलेनानेन चतुर्विंशति-होरासु राष्ट्रियराजधान्यां वायु-गुणवत्तासूचकाङ्कः सप्ताधिकत्रिशतं यावत् समङ्कितः।

<u>दाना चक्रवातः</u>

गुरु - शुक्रवासरयोः अर्धरात्रौ पुरी - सागर-द्वीपयोर्मध्ये भीषणातिभीषण-चक्रवातः दाना इति सम्भावाते। चक्रवातावधौ वायुगतिः विंशत्यधिकै- कशतकिलोमीटर मितां प्रति होरा भविष्यति । भारत-ऋतु- विज्ञान- विभागेन ख्यापितं यत् बङ्गाल खातेः मध्ये निर्मितम् अल्पभार- युतं क्षेत्रं पश्चिमोत्तर-पश्चिमीयभागं प्रति संवर्धयिष्यति। विभागेन बुधवासरतः शुक्रवासरं यावत्

ओडिशाराज्यस्य विविधेषु तटीयजनपदेषु निम्नवर्तिषु क्षेत्रेषु अत्यधिकवृष्टेः भविष्यवाणी कृता। धीवरेभ्यःच प्रत्यागमनाय आदेशः प्रदत्तः। तत्रैव राजधान्यां भुवनेश्वरे चतुर्विंशतिहोरां यावत् नियन्त्रणकक्षाः स्थापिताः । राष्ट्रियात्पद-बलं अन्यानि च बलानि अद्य तटीयजनपदेषु यास्यन्ति।

<u>लक्ष्यसाधनक्रीडा</u>

भारतीयक्रीडिका दीपिका कुमारी इत्येषा अद्य मेक्सिकोनगरे लक्ष्यसाधन क्रीडायाः विश्व-चषक- स्पर्धायां महिलानां रिकर्व-वर्गे रजतपदकं समर्जितवती। निर्णायकद्वन्द्वे चीनदेशस्य ली-जियामनइत्येष दीपिकां शून्यं षड् इत्यङ्कान्तरालेन पराजितवती।

।।इति वार्ता:।।